| छन्दसां वृत्तिनामानि । | | छन्दसां लक्षणगणाः । | छन्दसामुदाहरणानि । |
|---|---|---|---|
| पज्झटिका | | प्रतिपदयमकितषोड़शमात्रा नवमगुरुत्वविभूषितगात्रा । पज्झटिकापुनरत्र विवेकः क्वापि न मध्यगुरुर्गण एकः ॥ | |
| प्रथमे चरणे | १६ | ।।।।ऽऽऽऽऽऽ | तरलवतंसाश्लिष्टस्कन्धचलतरपज्झटिकाकटिबन्धः । |
| द्वितीये | १६ | ।।।।ऽ।।ऽ।।ऽऽ | मौलिचपलशिखिचन्द्रकवृन्दः कालियशिरसि ननर्त मुकुन्दः॥ |
| तृतीये | १६ | ऽ।।।।।ऽ।।ऽऽ | इयं प्रतिपदयमकितषोड़शमात्रा लघुगुरुव्यत्ययेनापि बहुधा। |
| चतुर्थे | १६ | ऽ।।।।।ऽ।।ऽऽ | अस्या नवमी मात्रा च कदाचित् लघ्वी भवति ॥ |
| दोहड़िका | | मात्रा त्रयोदशकं यदि पूर्व्वं लघुकविरामि । पश्चादेकादशकन्तु दोहड़िका द्विगुणेन ॥ | |
| प्रथमे चरणे | १३ | ऽऽऽ।।।।।।। | माइ दोहड़िपठण सुणि हासिओ काण्ह गोआल । |
| द्वितीये | १३ | ऽ।ऽऽ।ऽऽ। | वृन्दावणघणकुञ्ज चलिओ कमलरसाल ॥ |
| तृतीये | ११ | ऽऽ।।।।ऽ। | अस्यार्थः । हे मातः ! दोहड़िकापाठं श्रुत्वा हृष्टो गोपालो हसित्वा कमपि रसालं चलितः कुत्र वृन्दावनघनकुञ्जे वृन्दावनस्य निविड़निकुञ्जे । राइ इति क्वचित् पाठः तन्मतेन राधिकाया दोहड़िकापाठं श्रुत्वा ॥ |
| चतुर्थे | ११ | ।।ऽ।।।।ऽ। | गुरुलघुव्यत्ययेन बहुधा भवति । |
| अस्या अन्त्या मात्रा लघ्वी अपभ्रंशभाषया प्रचारः ॥ | | | |
| इति मात्रावृत्तानि समाप्तानि ॥*॥ | | | |

अत्र समवृत्तानि (२४७) सप्तचत्वारिंशदधिकं द्विशतं, अर्द्धसमवृत्तानि (१५) पञ्चदश, विषमवृत्तानि (७) सप्त, मात्रावृत्तानि च (१५) पञ्चदश, समुदायेन (२८४) चतुरशीत्यधिकद्विशतसंख्यकानि छन्दांसि लिखितानीति ॥ * ॥

छन्दकपातनः, पुं, ( छन्दकेन छद्मना पातयति लोकानिति । पत्+णिच्+ल्युः । ) छद्मतापसः । इति जटाधरः ॥

छन्दोगः, पुं, (छन्दो वेदविशेषं सामेत्यर्थः गायतीति । गै+"गोपोष्टक् ।" ३।२।८। इति टक् ।) सामगः । सामवेदी । इति जटाधरः ॥ (यथा, मनुः । ३ । १४५ ।
"यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् ।
शाखान्तगमथाध्वर्य्युं छन्दोगन्तु समाप्तिकम् ॥")

छन्दोगपरिशिष्टं, क्ली, ( छन्दोगेन सामगेन कात्यायनेन मुनिनेत्यर्थः । प्रणीतं यत् परिशिष्टम् । यद्वा, छन्दोगेभ्यः कृतं परिशिष्टम् ।) कात्यायनमुनिकृतं सामवेदिकर्म्मबोधकगोभिलसूत्राणां परिशेषशास्त्रम् । इति स्मृतिः ॥

छन्दोविचितिः, स्त्री, ( छन्दसां विचितिर्यत्र । ) श्रुतिच्छन्दसां प्रख्यापकं शास्त्रम् । इत्यमरटीकायां भरतः ॥ (यथा, वृहत्संहितायाम् । १०४ । ६४ ।
"विपुलामपि बुद्धा छन्दोविचितिं भवति कार्य्यमेतावत् ।
श्रुतिसुखवृत्तसंग्रहमिममाह वराहमिहिरोऽत्र ॥")

छन्नं, क्ली, (छद्+क्तः ।) रहः । निर्ज्जनस्थानम् । इति मेदिनी । ने, ५ ॥

छन्नः, त्रि, ( छद्+क्तः । ) छादितः । इति मेदिनी । ने, ५ ॥ (व्याप्तः । यथा, महाभारते । ३ । २० । २४ ।
"न हया न रथो वीर ! न यन्ता मम दारुकः ।
अदृश्यन्त शरैश्छन्नास्तथाहं सैनिकाश्च मे ॥")
रहः । इत्यमरः । २ । ८ । २२ ॥

छप, इ क सर्पे । इति कविकल्पद्रुमः ॥ ( चुरां-परं-सकं-सेट् ।) इ क, छम्पयति । सर्पो गतिः । इति दुर्गादासः ॥

छम, उ भक्षे । इति कविकल्पद्रुमः । ( भ्वां-परं सकं-सेट् । उदित्वात् क्त्वावेट् । ) छमति । उ, छमित्वा छान्त्वा । इति दुर्गादासः ॥

छमण्डः,पुं,(छमति भक्षयति जन्मग्रहणान्तरं पितरं नाशयतीत्यर्थः । छम+बाहुलकादण्डन् ।)म्टतपितृकः । इत्युणादिकोषः॥ छेमड़ा इति भाषा ॥ बन्धुहीनः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

छर्द्द, क वमने । इति कविकल्पद्रुमः । (चुरां-परं-सकं-सेट् ।) वमनं वान्तिः । क, छर्द्दयति अन्नं लोकः । इति दुर्गादासः ॥ ( तथाच, महाभारते । ५ । ६६ । ४२ ।
"स्वपन्ति च प्लवन्ति च छर्द्दयन्ति च मानवाः ॥")

छर्द्द, क्ली, ( छर्द्द+भावे घञ् । ) वमनम् । इति हेमचन्द्रः । ३ । १३३ ॥

छर्द्दनं, क्ली, ( छर्द्द+भावे ल्युट् । ) वमनम् । इति हेमचन्द्रः ॥ ( यथा, सुश्रुते । ४ । १० ।
"तत्रास्तु मदनालाबुविम्बीकोशातकीफलैः ।
छर्द्दनं दधुशदम्भिश्यामथवा तण्डुलाम्बुना ॥")

छर्द्दनः, पुं, ( छर्द्दयति नरपश्वादिकं ग्रसित्वा पुनरुद्गिरतीति । छर्द्द+ल्युः ।) अलम्बुषराक्षसः । (छर्द्दयति कटुगन्धेन उद्गिरत्यनेनेति । छर्द्द+ल्युट् । ) निम्बवृक्षः । इति हेमचन्द्रः ॥ मदनवृक्षः । इति भावप्रकाशः ॥

छर्द्दापनिका, स्त्री, ( छर्द्द वमनं आपयति प्रापयतीत्यर्थः । आप्+णिच्+ल्युः । ततः स्वार्थे कः । टापि अत इत्वञ्च । ) कर्कटी । इति राजनिर्घण्टः ॥

छर्द्दिः, स्त्री, ( छर्द्दयत्यनेनेति । छर्द्द वमने+इन् । ) वमिरोगः । वाँति इति भाषा ॥ तत्पर्य्यायः । प्रच्छर्द्दिका २ छर्द्दम् ३ वमथुः ४ वमनम् ५ वमिः ६ । इति हेमचन्द्रः । ३ । ३३ ॥ छर्द्दिका ७ छर्द्दीका ८ वान्तिः ९ उद्गारः १० । इति राजनिर्घण्टः ॥ उत्कासिका ११ छर्द्दनम् १२ । इति शब्दरत्नावली ॥ तस्या निदानादि यथा,—
"दुष्टैर्दोषैः पृथक्सर्व्वैर्वीभत्सालोकनादिभिः ।
छर्द्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते ॥
अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरति ।
अकाले चातिमात्रैश्च तथा सात्म्यैश्च भोजनैः ॥
श्रमाद्भयात्तथोद्वेगादजीर्णात् क्रिमिदोषतः ।
नार्य्याश्चापन्नसत्त्वायास्तथातिद्रुतमश्नतः ॥
वीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात् ।
छादयन्नाननं वेगैरर्द्दयन्नङ्गभञ्जनैः ॥
निरुच्यते छर्द्दिरिति दोषो वक्त्रं प्रधावितः ॥"
तस्याः पूर्ब्बरूपं यथा,—
"हृल्लासोद्गाररोधौ च प्रसेको लवणस्तनुः ।
द्वेषोऽन्नपाने च भृशं वमीनां पूर्ब्बलक्षणम् ॥"
वातजायास्तस्या रूपं यथा,—
"हृत्पार्श्वपीड़ामुखशोषशीर्ष-
नाभ्यर्त्तिकासस्वरभेदतोदैः ।
उद्गारशब्दप्रबलं सफेनं
विच्छिन्नकृष्णं तनुकं कषायम् ॥
कृच्छ्रेण चाल्पं महता च वेगे-
नार्त्तोऽनिलाच्छर्द्दयतीह दुःखम् ॥"
तस्याः पित्तजाया रूपं यथा,—
"मूर्च्छा पिपासा मुखशोषमूर्द्ध-
ताल्वक्षिसन्तापतमोभ्रमार्त्तः ।